This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

१ ॥श्रीगणेशायनमः॥अथातोवरणगोत्रपृच्छायांमाह्कृतिब्राह्मणमध्यदेशोद्भवः।कृतरोमध्यदेशः।
प्रयागदेशात्पश्चात्काम्पिल्याद्युदक्यापारियावत्।दक्षिणेहिमवंतोगंगायमुनयोरंतेएकेमध्य
देशमित्याचक्षते।हिमवद्विंध्ययोर्मध्येयत्प्राग्विनशनादपि॥प्रसंगेवमप्रयागाच्चमध्यदेशःप्रकीर्तितः।
१॥अन्यच्च।सृष्ट्यादौब्रह्मणावेदामुखेभ्यश्चविनिर्गताः।तत्रैवचलयंयांतिप्रलयेसमुपस्थिते॥२॥
अन्यच्च।विष्णोर्जलशायिनोनाभेःपद्मगर्भमुपस्थितः।तस्मिन्ब्रह्मासमुत्पन्नस्तेनसृष्टंचराचरं।३।
रस उद्भवात्मनश्चैवमनःसदसदात्मकं।मनसश्चाप्यहंकारंअभिमंतारमीश्वरं।४।वैकारिकंतैजसंचतथा
भूतादिमेवच।एकमेवत्रिधाभूतमहमित्येवमुक्तिदं।५।तस्ययोहंनिःशस्यांतेमस्तकमप्रतिबुध्यते।
प्रतिबुद्धश्चभूतिंचमनःसदसदात्मकं।६।मनःसृष्टिंविकुरुतेचोद्यमानंसिसृक्षया।मनसाकाश न
मुत्पन्नंतस्यशब्दंगुणंविदुः।७।आकाशाज्जायतेवायुःसर्वस्पर्शगुणोत्तमः।वायोरुत्पद्यतेज्योति त
रूपश्चतमनाशनं।८।ज्योतिषंचविकुर्वाणमापोरसगुणाःस्मृताः।अद्भ्योगंधगुणाभूमिरित्येषा १

सृष्टिरादिता।९।अन्यच्च।निरंजनाद्भवोव्योमोव्योमाद्वायुःप्रजायते।वाताप्रजायतेतेजोतेजसआपःप्र
जायते।१०।जलाच्चजायतेपृथ्वीतस्यांपिंडःप्ररोहति।अन्यच्च।आकाशाज्जायतेवायुर्वायोरुत्पद्यते
रविः।११।रवेरुत्पद्यतेतोयंतोयमुत्पद्यतेमही।तथाच।तालुमूलेभवेच्चन्द्रोनाभिमूलेभवेद्रविः।सूर्याग्रे
वह्नितेवायुश्चन्द्राग्रेवसतेनभः।१२।सूर्याग्रेवसतेचित्तंचंद्राग्रेजीवमुच्यते।एतत्ज्ञोप्यतरंदेविगुरोर्व
क्त्रात्तुलभ्यते।१३।आदित्याज्जायतेप्राणःप्राणादुत्पद्यतेमनः।मनोरुत्पद्यतेवाचामनोवाचाविली
यते।१४।वेदोयस्तुनजानातिशास्त्रंतस्यकरोतिकिं।मयोयस्यस्वयंप्रांतितत्रवाचाकथंभवेत्।१५।
अन्यच्च।आसीदिदंतमोभूतमप्रज्ञातमलक्षणं॥अप्रतर्क्यमविज्ञेयंप्रसुप्तमिवसर्वतः॥१६॥ततः
स्वयंभूर्भगवान्व्यक्तोव्यंजयन्निदं॥महद्भूतादिवृत्तौजाःप्रादुरासीत्तमोनुदः॥१७॥योसावतींद्रिय
ग्राह्यःसूक्ष्मोव्यक्तःसनातनः॥सर्वभूतमयोचिंत्यःसएषःस्वयमुद्भवौ॥१८॥सोभिःस्याध्यशरीरात् धाम
स्वात्सिसृक्षुर्विविधाःप्रजाः॥आपएवससर्जादौतासुवीर्यमवासृजत्॥१९॥तदंडमभवद्धैमंसह

K.K.S.U. LIBRARY
RAMTEK
441 106
M-839
Dist Nagpur

Checked 2012

Accession No.- 8457 M839.
Title:- वेदमंदे
Author:- कात्यायनगोत्रोत्पन्न परिशिष्ट
Date: शक 1785 संवत -1920
सन 1863
पेज: - 15

(1)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ स्त्रांशुसमप्रभं।।तस्मिन्नंडेस्वयंब्रह्मासर्वलोकपितामहः।।२०।।आपोनाराइतिप्रोक्ताआपोवैनरसून
वः।।तायदस्यायनःपूर्वंतेननारायणःस्मृतः।।२१।।नारायणपरोव्यक्ताअंडमव्यक्तसंभवं।।अंडस्यांत
स्त्विमेलोकाःसप्तद्वीपाचमेदिनी।।२२।।एतत्कारणमव्यक्तंनित्यंसदसदात्मकं।।एतद्विशिष्टपुरुषोलोके
ब्रह्मेतिकीर्तितः।।२३।।तस्मिन्नंडेसभगवानुषित्वापरिवत्सरं।।स्वयमेवात्मनोध्यानात्तदंडमकरोद्द्विधा
।।२४।।ताभ्यांसशकलाभ्यांचदिवंभूमिंचनिर्ममे।।मध्येव्योमदिशश्चाष्टावपांस्थःशाश्वतं।।२५।।तथा
चश्रुतिः।आपोहवाइदमग्रेसलिलमेवास।असद्वाइदमग्रआसीत्।सोकामयतप्रजापतिः।प्रजाप
तिर्हवाइदमग्रएकएवास।इत्यादिश्रुतिरनंतानि।अथकिंपूर्वोभवानाप।।पूर्वोभक्तिमाप्नोति।ॐका
रादिसावित्रीप्रस्थानं।।दिवंस्पृशतिभूमिंचशब्दपुण्यस्यकर्मणः।।यावांशब्दोसभवतितावत्पुरुष न्
उच्यते।।ततोभूत्रिवरोंकारोयोव्यक्तप्रभवन्त्स्वयं।।येनलिंगंभगवतोब्रह्मणःपरमात्मनः।।२।।स
र्वस्यैवहिशास्त्रस्यकर्मणोवापिकस्यचित्।।यावत्प्रयोजनंप्रोक्तंतावत्तत्केनगृह्यते।।३।।ढेब्रह्म २

२

णिवेदितव्येशब्दब्रह्मपरंचयत्।शब्दब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छति।।४।।परावरेब्रह्मणीयंसदा
ऽर्वेदात्मानंवेदनिधिंमुनीन्द्रैः।।तंपद्मगर्भंपरमंमत्वादिदेवंमणप्रचालक्षणमाह्यात्तवल्क्यः।।५।।यंज्यो
तिरजंतंप्राहुर्यंयोगाःसमुपासते।।सब्रह्मतन्मंत्रस्ययोनिःसदसदात्मकं।।६।।ततोभवत्स्वधाम्नोस्यधामनो
ब्रह्मणःसाक्षाद्वाचकःपरमात्मकः।।ससर्वमंत्रोपनिषद्वेदबीजंसनातनं।।७।।तस्यह्योंसंत्रयोवर्णा
अकाराद्याभृगुर्वदेत्।।धार्यंतेयैस्त्रयोभावागुणनामार्थवृत्तयः।।८।।ततोक्षरसमाम्नायमसृजद्भग
वानजः।।अंतःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं।।९।।तेनासौचतुरोवेदांश्चतुर्भिर्वदनैर्विभुः।।सव्याहृ
तिकान्सप्रणवांश्चतुर्होत्रविवक्षया।।१०।।ॐकारश्चाथशब्दश्चद्वावेतौब्रह्मणःपुरा।।कंठंभित्वाविनिष्क्रां
तौतेनमांगलिकावुभौ।।११।।तथाच।।ध्रुवमेकाक्षरंब्रह्मॐमित्येवव्यवस्थितं।।बृहत्वाद्बृंहणत्वाच्चतद्ब्रह्मे
त्यभिधीयते।।१२।।दीपकःसर्वमंत्राणांॐकारोयंपुरोदितः।।आशीर्वादेभिषेकेचजाप्येतत्पूर्वमुच्चरेत्
।।१३।।मंत्रादौसूतकंप्रोक्तंमंत्रांतेमृतकंभवेत्।।उभयोर्दोषमापन्नंजापकस्तुकथंभवेत्।।१४।।ब्रह्मणः

2

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ प्रणवं कुर्याद्दारावंतेच सर्वदा ॥ क्षरत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यते ॥ १५ ॥ ओं अनुस्वारसंबंधः पनम
श्रुहः पुनः ॥ सप्ताक्षरैः स निष्पन्नं मुनिः प्राह पराशरः ॥ १६ ॥ वायुप्राणं कोष्ठमनुप्रदानं कण्ठस्य स्वविवृतेन संवृतेन वा ॥ आपद्यते श्वासतां नादतं त्रं वा चेक्तिहापायश्मेशरीरा ॥ १७ ॥ नादोयं नदते यासु स च पंचविधः स्मृतः ॥ सूक्ष्मसूक्ष्मतरश्चैव व्यक्तो व्यक्तिश्चकृत्रिमः ॥ १८ ॥ सूक्ष्मनादो गुह्यवासः हृदये चातिसूक्ष्मकः ॥ कंठमध्ये स्थितो व्यक्तः अव्यक्तस्तालुदेशतः ॥ १९ ॥ कृत्रिमो मुखदेशे तु स च पंचविधः स्मृतः
॥ २० ॥ स ॐ मिति मस्त्वारिति त्रिमात्रोनुस्वारस्थाने समवस्युदात्तः ॥ चतुर्मात्रो वार्द्धपूर्वो नुदात्तः षण्मात्रो वा भवति ह्रस्वरस्वन् ॥ २१ ॥ त्रिस्थानाच्च त्रिमात्राच्च त्रिब्रह्मा स्यक्षरं परं ॥ तिस्रस्सार्द्धानुमात्रा वेयस्तं वेद स वेदवित् ॥ २२ ॥ चतुर्मात्रस्तु षण्मात्रः प्रणवैः परिकीर्तितः ॥ पूर्वस्वम्परो नादः षण्मात्रः
परिकीर्तितः ॥ २३ ॥ तथा च ॥ आद्यं यत्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता ॥ स गुह्योन्यस्त्रिवृद्वेदो यस्तं वेत्ति
स वेदवित् ॥ २४ ॥ ऋचो यजूंषि चाग्राणि सामानि विविधानि च ॥ एष त्रेय स्मिन्वदेद्यो यो वेदेन स ३
वेदवित् ॥ २५ ॥ ऋग्वेदः स्वरितोदात्ताएकाक्षर उदाहृतः ॥ त्रैस्वर्यं ततो ह्यातो यजुर्वेदे तु पठ्यते ॥ २६ ॥ दीर्घः प्लुतः सामवेदे ॐकारो चात्र संशयः ॥ संक्षिप्तो दात्तमेवाहुरेकाक्षरमुदाहृतः ॥ २७ ॥ अथर्ववेदे पूर्वदृष्टं मात्रोदात्ते प्रयुज्यते ॥ २८ ॥ असु चटतपाश्चैव चभंतस्थोष्मा णमेव च ॥ अष्टवर्गाण्यनामानि आदिभूतं द्वयं ॥ २९ ॥ यं
मारूपो ब्रह्मरूपी च अरूपी सर्वरूपकः ॥ गीरूपी समसारूपी असंख्यानंतरूपकः ॥ ३० ॥ तथा चाथर्वणश्रुतिः ॥ तस्यो वेदप्रणवस्यायां पूर्वा मात्रा पृथिव्यकारः ॥ स ऋग्भिरृग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः सा साप्रथम पादो भवति ॥ ३१ ॥ द्वितीयांतरिक्षं स उकारः स यजुर्भिर्यजुर्वेदो विष्णुरुद्रास्त्रिष्टुप् दक्षिणाग्निः सा
द्वितीय पादो भवति ॥ ३२ ॥ तृतीया द्यौ स मकारः स सामभिः सामवेदो रुद्रादित्या जगत्याहवनीयः सा तृतीय
पादो भवति ॥ ३३ ॥ यावसाने स्य चतुर्थी मात्रा सा सोमलोक मोंकारः ॥ तथर्वणोमंत्रैरथर्ववेदः संवर्तकाग्नि
मरुतो विराडेक ऋषिर्भास्वती सा सा म्नाश्चतुर्थः पादो भवति ॥ हिंकृत्वान्वाहरस्यादि श्रुतिरनंतानि ॥ किंनब्रह्मचारी भवति अध्वर्युः अस्मिन्वाजसनेयो न विद्यते ॥ पंचदश वाजसनेयानां भेदाः ॥ तस्यै ते कण्वादीनां

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

आद्योअस्याक्षरंपदमितिसूत्रं। माध्यंदिनादि माध्यंदिने सवनेनेति श्रुतेः। तेषांमध्येपंचदशपदारणंप्रति
ज्ञाः प्रतिशाखानुधर्माः सोहंवाजसनेयेष्वध्वर्युः तत्रभाष्येदृष्टांतंतत्रपरमेश्वरः प्रसादाद्विशिष्टकर्मजनि
तसंस्कारसंतानानुच्छित्तिधर्माणः स्मृतिबुद्ध्यायेनसदसदात्मकोहिहिरण्यगर्भप्रभृतयः कल्पादौस
ह विद्ययोभिव्यज्यमानाः।। स्मर्त्तारोमंत्राणांदृष्टारः ऋषयउच्यन्ते।। एवंहिरण्यगर्भादिपरंपरयानित्योवे
दः तेनवेदेनमथ्यमानास्तत्रतत्रज्ञायंते।। तथाचश्रुतिशास्मोद्धातन्नेस्य सर्वथैर रत्नपा।। अन्येषांसर्वधर्मा
णांयुगपत्त्रयपरेतथा।। कल्पेकल्पेयस्योत्पत्तिर्ब्रह्माविष्णुमहेश्वराः।। श्रुतिस्मृतिसदाचाराः नक्षयंप्रभ
वंतिच।। नकश्चिद्वेदकर्ताचवेदस्मर्ताचतुर्मुखः।। तथैवधर्मंस्मरतिमनुःकल्पांतरेत्तरे।। वेदानधीत्यवेदौ
वावेदंवापियथाक्रमं।। अविप्लुतब्रह्मचर्योगृहस्थाश्रममावसेत्।। सत्यज्ञानानंतानंदात्मकोभगवान्व
शीकृतः सपोविष्णुर्लीलयासर्वजगदाकारेणविवर्त्तते। अतएवेश्वरेच्छयाविग्रहरूपस्यसमष्टिरूप
स्यवाव्यष्टिरूपस्यापीश्वरत्वं। अतः शाखादीनामपिदेवतात्वमुपपद्यते।। पार्थिवेत्वादृशेषोपिश्रीभ ४
गवदनुग्रहबलात्संनिधिविशेषवशेनशालिग्रामप्रतिमादिवद्देवताश्चोपपत्तिर्यः सर्वेषुभूतेषु

षतीसादिश्रुतेः। यदेतन्मंडलंतपतीतिसूर्यब्राह्मणे इत्यथ्यः। सत्यज्ञानानंतानंदात्मभूतादृशीकृतमया
ब्राह्मणआविर्भूतोयजुर्वेदकल्पतरुः। तस्यास्य ऋग्वादिशाखाभगवान्वेदव्यासोविभज्यपैलवैशंपायन
सुमंतुजैमिनिनारदेभ्योददौ। तत्रापिसर्ववेदमयान्सर्वशाखाभिज्ञान्श्रीमद्भगवतोविवस्वतोयाज्ञवल्क्य
शुक्लानियजूंष्यभिजगौ। ततस्तानिसस्वयंपंचदशधाविभज्यतत्तन्नाम्नीयशाखातन्नामभ्यः शिष्ये
भ्योददौ। सर्वशाखाभिजाबालादिवेदनामासावेदइतिविद्यते। समामासावुत्तरादर्शमंत्रब्राह्मणयोर्द्वि
जाः। ॐ खंब्रह्मेतियोध्यायन्दर्शकश्चोपबेधसः। ज्ञायतेलभ्यतेवाएभिर्धर्मादिपुरुषार्थइतिवेदाः। मं
त्रब्राह्मणयोर्वेदइतिनामधेयं। तत्राहिअव्यभिचारेणतत्स्वरवर्णमात्रापूर्वकपाठः सर्वकामान्सर्वदेशेषु
प्रतिचरणमविभागेनैकैकोमंत्रराशिर्वेदइत्युच्यते। मंत्रब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यते। यजुर्वेदः स
विज्ञेयोअन्येशाखांतरास्मृताः। त्रिगुणंपठ्यतेयत्रमंत्रब्राह्मणयोः सह।। यजुर्वेदः सविज्ञेयोअन्येशा
खांतरास्मृताः।। एकआसीद्यजुर्वेदस्तंचतुर्द्धाव्यकल्पयत्।। चातुर्होत्रमभूद्यस्मिंस्तेनयज्ञमथाक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ रोत्॥ अविभागस्तथाशुक्र अक्षरं बहुधात्मकं। परमब्रह्मणे तस्मै नित्यमेव नमो नमः॥ ॐकारस्त्रिगुणः
प्रोक्तः स्वं ब्रह्म त्रिगुणं स्मृतं॥ माध्यंदिनीयशाखायां यजुर्वेदं पठंति हि॥ विध्यर्थवादमंत्रेषु वेकाराषु
भक्तीर्तितः। विधिर्विधेयस्तर्कश्च वेदः षडंगमेकेन कल्पमात्रे। एतद्धि दृष्टो विद्वांसो त्रयी निष्कर्षमन्व
हं। क्रमशः पूर्वमभ्यस्य पश्चाद्वेदमधीयते। ऋचो यजूंषि सामानि गाथां गाद्यामथापि या। वेदशब्दे
भ्य एवादौ पृथक्संस्थाश्च निर्ममे॥ कर्मात्मनां तु देवानां सोऽसृजत्प्राणिनां प्रभुः। साध्यानां च गणं
सूक्ष्मं यज्ञं चैव सनातनं॥ अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनं। दुदोह यज्ञसिध्यर्थं ऋग्यजुः
सामलक्षणं। सर्वेषां तु समानानि कर्माणि च पृथक्पृथक्॥ आद्याये तु चतुःपादा शतसाहस्रसं
मिता॥ ततो दशगुणः कृत्स्नो यज्ञो यः सर्वकामधुक्। सोयमेको महावेदस्तत्रं तेन पृथक्कृतः। चतु
र्धा थततो जातं वेदपादपकाननं। तथा च सरमास्त्री अन्वेदानभितत्तपे। तदाहुः तदेतेन त्रयेण वे
देन। स्तोमश्च यजुश्च। तद्यथा त्रीणि प्रथमानि। यजुषो ह वै देवा। अयं वाव यजुर्योऽयं पवते। त्रयी ५

विद्या। यद्यह। चत्वारि शृंगा। सपथाद्वैधाग्ने। अयमेवाकाशो जूः। तदेतं दृत्वा भुक्तं। इत्यादिश्रुतिरनंता
नि। तथा च। कूर्मे च। सोमुखो नाम सुरद्वेषी महाबलः॥ स्कंराणामेपकाराय वेदानाहृत्य चार्यवः। भक्ष
यित्वा बहून्वेदान्सपाताले समाविशत्। हित्वा न्विदार्यतान्वेदान्ब्रह्मणे स ददौ हरिः। एतज्ज्ञात्वा ततः कृत्स्नम
त्वा भानुर्महामतिः। तस्मात्पूर्वं हि शुद्धानि यजूंष्येव जगुर्गोपतेः॥ अयातयामानि तेभ्यो गुरुमानव्यानि ज्ञा
तानि च नीरसानि॥ यजूंषि तेषामथ याज्ञवल्क्यः त्वयातयामानि रवेरवाप॥ तथा च श्रुतिः। आदित्या
नीमानि शुक्लानि। आदित्यो लब्ध्वा न्याः कुशाखाः पंचदश परा। तं याज्ञवल्क्यमहं वंदे मंत्रभाष्यस्य सि
द्धये। याज्ञवल्क्यमतः सूर्यमाराध्यास्मादधीतवान्। व्यवस्थितमकारेण यजुः शुक्लानि नीर्यते। इ
त्यादि श्रुतिस्मृति पुराणेषु आदिभूतो यं शुक्लयजुः। तस्येते यजुर्वेदस्य षडशीति भेदा भवंति इत्यादि
शौनकेनोक्तं चरणव्यूहे। ऋग्वेदाक्षरं आरोह अल्पाक्षरपदमिति सूत्रं। एतत्कारणार्थं प्रथमत्वं खं
तु अंग उपांग परिशिष्टस्य तिश्चेति। तस्यं तिष्ठितीयः यजुर्वेद खंडेस्मिन्। एतत्कारणार्थं सर्वग्रंथे
यजुर्वेदः प्रथमं। तस्याश्च चरणकृग्यजुः कृष्णसामाथर्वाणि। तन्मध्ये त्रीणि यज्ञोपकारिणः। तथा च

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ शुक्लयजुर्ग्रंथे त्रयस्त्रिंशानि भवंति। षड्ऋतवः संवत्सर इति श्रुतेः। संवत्सरश्चतुर्दशः प्रजापतिश्चतुर्दश
इति। एतत्कारणार्थं मया निवेदितं। अथातो यजुर्वेदस्य षडशीतिर्भेदा भवंति ज्ञातव्याः पृथक्पृथक्।
तस्यादिः शुक्लयजुर्व्याख्यायते। तस्मिन्नेते च चत्वारिंशदध्याया मंत्रचतुर्दशकांडानि। एतद्विवरणं ज्ञातव्यं।
तन्मध्ये इषेत्वा कृष्णोसि हविर्यत्कांडं प्रतिपादितं दर्शपूर्णमासेष्टिः। समिधाग्निरेक्यादि कृयाम
ग्निहोत्राग्न्युपस्थानं चातुर्मास्यानि। एदमग्ने त्वन्नूर्देवस्य त्वा वाचस्पतय उपयामगृहीतोसि पंच अ
ध्वरग्रहेष्वग्निष्टोमः। देव सवितः पोदेवासः सर्वे शुवाजपेयो राजसूयः। सुंजान दृशानमपिगण्हामि भ
वक्षिति रग्ने जातान्नमस्तेश्मन्नूर्जं वाजश्चोयासंभरणं हस्तिषट्चितिका संचितिकाग्निरहस्यानि
चरकसौत्रामणीश्च यननाम। अष्टाध्याये मध्यमेषि ब्राह्मणाग्निहोत्रादि श्रामश्चित्तावभृथस्ना
नेहृतहृत्यसौत्रामण्यभिषेकः शांतिश्चेत्यादि। स्वाहा न्नाहाद्गस्य योनि रिमं मे होतायक्षत् मध्यम
कांडे सौत्रामणीयागः। तेजोसि हिरण्यगर्भाश्वस्तूपरः शगरर्द्धिदश्व मेधेश्वमेधयागः। अग्निश्च स
मास्त्वाग्निकोध्यायः। इन्द्रमिंद्र सौत्रामणीकोध्यायः। समिद्धो अंजन्नाश्वमेधिकोध्यायः। देव सवितः ६

सहस्रशीर्षापुरुषस्त्वदेवानुवाकः सर्वमेधोध्यायः। अस्याजरासः यज्ञात्रतो नाधीतारम्याधीनमंत्र
गणः। अपेतानुवाकः पितृमेधअश्वमेधे। ऋचंवाचं शांतिकोध्यायः। अश्वमेधिकयजं देवस्य त्वा मरवा दे
वस्य त्वा स्वाहा प्राणेभ्यः प्रवर्ग्यो प्रवर्ग्य कर्मनाम विशेषं। ईशावास्यमुपनिषदे ब्रह्मविद्या। एवं चत्वारिंशद
ध्यायाः। चतुर्दशकांड सहितं यत्तानुक्रमणिकाज्ञातव्या। देवायज्ञ अश्वस्तूपरः शादन्द्विस्त्वंगतेनपसेनु
वाकाः ब्राह्मणं। तेन च मध्ये त्रयोदशविधा वाक्यार्थः। इषेत्वादि मंत्रगणे शुभायशो दृश्यते। विध्यर्थवादपा
यसी स्तुति मैत्रेषप्रवल्हिका। प्रश्नोत्याकरणं कर्तुं पूर्वं चत्रानुकीर्त्तनं। अवधारणं चोपनिषत्वाक्यार्थास्त्रयो
दश। तथैतेषामुदाहरणानि। तत्र विधिः परमेष्ठ्यभिधीतः। अश्वस्तूपरो गोमृग इत्याद्यर्थवादः। देवाय
ज्ञमतन्वते त्यनुवाकयोत्या। तनूपा अग्नेसि तन्वं मे पाहीत्यादि आशीः। आवो देवासईमहे इत्यादि श्रुतिः
अग्निर्मूर्द्धा दिव इत्यादि प्रैषः। होता यक्षत्समिधाग्निमित्यादि प्रवल्हिका। इन्द्राग्नी आगतमित्यादि प्रश्नः। कः
स्विदेकाकी चरति व्याकरणं। सूर्य एकाकी चरति इत्यादि तर्कमागधः। कस्य स्विदन्ममित्यादि पूर्वचत्रानुकीर्त
नं। ॐ ख्यधयः समवर्ततइत्यादि अवधारणं। तमेव विदित्वातिमृत्युमेति उपनिषत्। ईशावास्यमित्यादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ अथ त्रैराश्यं कृत्वा केनोपमायायाः कर्मोपसंग्रहार्थीयाः पादपूरणार्था इति वदंति। उपमार्थीयास्तु मंत्र
वचनात्। चवाहअहइत्यादयः। तद्यथा। वातो वा मनो वा। अग्निश्च पृथिवी इत्यादि पादपूरणार्थाः। पादमे
व पूरयंति न त्वर्थान्तरं वदंति। इमानुक्रमित्यादयः। अथ मंत्राः द्रव्यदेवताप्रकाशके। मंत्राः करणानुमंत्रा
दिभेदेन बहुविधः। मंत्राणां स्वरवर्णाक्षरमात्राम्नायेण तन्मंत्रज्ञानं। ऋषिर्देवतं छंदो विनियोगः। ब्रा
ह्मणयुक्तो मंत्रः पंचविधः। एवं सर्वथा ज्ञातव्यं। अन्यथा मंत्रज्ञानं न भवति। अथ मंत्रलक्षणमाशीस्तेषां
निर्देशा ब्रूयात्। प्रतिषेध इति सूत्रलक्षणविधिर्निंदा प्रशंसाध्यात्ममधियज्ञमधिदैवतमधिभूतश्रुकु
वचनं। परकृतिपुराकल्पस्तुतिरिति ब्राह्मणं। अथ ब्राह्मणशतपथे किं ब्रूयादित्याशंक्याह। अथ वेदे ऋ
षयः तत एतत्परमेष्ठी प्राजापत्सोयज्ञं दर्शः। यद्दर्शपूर्णमासाविति। दर्शपूर्णमासद्रव्यदेवता मंत्रादिस
र्वं परमेष्ठिना दृष्टमित्यर्थः। तथा। दध्यङ् ह वा आथर्वणा एतं शुक्रमेतं यज्ञं विदांचकार स्तुपक्रम्य तद्
द्राश्विनोरनुष्टमासेत्यादिना प्रवर्ग्यगतानां मंत्राणां दध्यङ्गाथर्वणस्तत्र ऋषिरवगम्यते। प्रजाप
तिः प्रथमां चितिमपश्यदित्युपक्रम्य सर्वा हैतदेवं चितिनामार्षेयं वेदेत्यादिना ऋषिश्च ज्ञानं प्रज्ञानिरदृश ७

र्यति। मंत्रयाथात्म्यमभिधेयं। तत्र वेदे प्रथमसाम्नामंत्राः पौरोडाशिनिकाः पितृयज्ञिका अतऊर्ध्वमग्न्या
धेयं। अग्निहोत्रं दर्शपूर्णमासा वाग्रयणश्च चातुर्मास्यनिरूढपशुबंधो ध्वरग्रहा सैषामानयहंतीन
नोष्टापद्यामंत्राः। आग्निकासात्विकाश्च ततो वाजपेयो राजसूयः। सौत्रामणी अश्वमेधः पुरुष
मेधः प्रवर्ग्यज्ञानविद्या शतपथोक्तचशतानि ताम्र इति सोहवाजसनेयेष्वध्वर्यवं इति सत्राण्यमहीना वि
कारेश्वमेधः पुरुषमेधोग्निविकारः। चातुर्मास्यानां पशुबंधानां सोमवतां। एतान्येव यजूंषि वाज
सनेयीनां भवंति। वाजसनेयादिपंचदशशाखा भवंति। केचिन्मतं सप्तदशशाखा। तस्यैते जाबाला बौ
धेया काण्वा माध्यंदिना शापेयास्थापायनीयाः कापाला पौंड्रवत्सा आवटिकाः परमावटिकाः पारा
शर्या वैनेया वैधेया गालवा बैजवा कात्यायनीयाश्चेति। तेषामध्ययनं। द्वे सहस्रे शते न्यूने मंत्रे वा
जसनेयके।। ऋग्गणः परिसंख्यातं शेषमन्यत्तो यजुः।। शुक्रियं सखिलं मंत्रं ब्राह्मणं च चच
तुर्गुणं। अष्टौ सहस्राणि शतानि चाष्टावशीतिरन्यान्यप्यधिकान्ययजूंषि। मंत्रान्विभक्तं सखिल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८ लं सशुक्रियं माध्यंदिने वाजसनेयचारव्यं ॥ तथा च ॥ अष्टौ सहस्राणि शतानि चाष्टौ ऋग्भिर्विभक्तः
सखिलः सशुक्रियः ॥ स्वर्याह्वभंते मुनियाज्ञवल्क्यो एते समस्ता यजुषां तु वेदः ॥ शुक्लयजुर्वेदस्य विव
स्वान् ऋषिः वायुरूपी प्रजापतिर्देवता सर्वाणि छंदांसि त्रिष्टुप् छंदः भूर्भुवः स्वस्त्रैविद्यात्मको ग्निर्वा
युस्सूर्यो देवता गायत्री त्रिष्टुप् जगती छंदः ॐकारमूलो ऋक्कुं यत्र सामगुण्यं यजुरधिकफलोऽथर्वगंधो
यत्सोपाद्विभुजमधुपगणो परक्रमजराधिशरवो त्रिसवनसैओ देवानाममृतमयो दित्येस्कवर्णता
त्रवर्णा सतविंशत्परान्निमात्रो मंत्रेशो चंचलास्यरूपो विरंचिवदनान्निर्गता श्वभरद्वाजवसिष्ठक
श्यपमनुमार्कंडेयपराशरव्यासो वाल्मीकसाश्वदेसक लोब्रंसा उद्दालकनासिकेपनारदहारितया
ज्ञवल्क्यास्यो आदिराद्रिभूतोयं वेदकल्पतरुः ॥ तथा च ॥ रूशाश्वदीयाश्वसुवर्णनेत्रं पृथुलं निर्मलं वे
दयजुः कपाली ॥ शास्त्रं सर्वाण्यपि वेदसारं गुणान्वितं चाष उशीतिभेदं ॥ १ ॥ रूशोदीर्घः कपाली
च यजुर्वेदः स्फुनिर्मलं ॥ साधारः सर्वशास्त्राणां वेदानां गुणनायकः ॥ २ ॥ स्वस्ति श्री यजुर्वेदं चंचलास्यसु
रूपो भानुप्रभाभासुरो मंत्रेशो ब्रह्मवा विरंचिवदनोनिःसर्गता भूतले ॥ भारद्वाजगौतमवशिष्ठमनुः ८

मार्कंडेयपराशरव्यासो वाल्मीकसाक्षाद्दे सकलाश्रुकुंचसंज्ञं चयत् ॥ ३ ॥ तन्मध्ये माध्यंदिनी प्रशंसा
॥ मंडलं दक्षिणमक्षि हृदयं चाधिष्ठितं येन शुक्लानि यजूंषि भगवान् याज्ञवल्क्यो यतः प्रापतं विवस्व
तं त्रयीमयमर्चिषंतमभिध्याय माध्यंदिनीय वाजसनेयाख्य यजुर्वेदाम्नाये सर्वे सखिले सशुक्रि
य ऋषिछंदांस्यनुक्रमिष्यामः ॥ तथा च ॥ माध्यंदिनी तु याशाखा सा सर्वसाधारणी स्मृता ॥ नामैव तु गुरु
रूप सर्वशिष्टैन प्रकाशितं ॥ अथादित्ये यजुर्वेदभेदे माध्यंदिनीयके ॥ यस्या मियजुषं सम्यग्विभागं तु
यथाक्रमं ॥ हारितमाद्यं परमं पवित्रं विद्याप्रमाणं यजुषां मताय ॥ सो ब्रह्मसंतानमिहाब्रवीत् सा
लोक्यमग्र्यं यजुषां च गच्छति ॥ ३ ॥ मंत्रब्राह्मणकल्पानां साम्नां च यजुषामपि ॥ षष्ठो यं प्रविभागज्ञो
सोध्वर्युस्त्व मुपकल्पते ॥ ४ ॥ पुराणं न्यायमीमांसाधर्मशास्त्रांगमिश्रितं ॥ वेदास्थानानि विद्यानां ध
र्मस्य च चतुर्दश ॥ ५ ॥ तत्रांगं ॥ शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमित्यंगानि ॥ शब्दे छंद
सि कल्पे च शिक्षायां च स्फुनिश्चितं ॥ ज्योतिषामयनं चैव सनिरुक्तांग विद्भवेत् ॥ तथा च कल्पः ॥ वे
दविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रं ॥ नैरुक्तं पदविभागमंत्रार्थदेवतासंनिरूपणार्थं
व्याकरणं शब्दार्थप्रसाधकं शास्त्रं ॥ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ नारत्नं। छंदोगायत्र्यादीनां छंदसां ज्ञानशास्त्रं। ज्योतिषं कालपरिज्ञानार्थं शास्त्रं। इत्यंगानि। अथोपां
गानि। प्रतिपदमनुपदं छंदोभाषाधर्मो मीमांसान्यायस्तर्क इत्युपांगानि। प्रतिपदमनुपदं पूर्वार्द्धं परार्द्धं।१।
छंदोभाषा। भाषा तु द्विविधा लौकिकी वैदिकी चेति।२। धर्मः धर्मशास्त्राणि स्मृतिः। उपस्मृतिश्च आचा
राद्युपदेशकं शास्त्रं।३। मीमांसा पूर्वोत्तरश्चेति वेदवाक्यार्थविचारणाय शास्त्रं।४। न्यायः पुराणमुपपुराण
श्चेति स्थित्युत्पत्तिप्रलयादिसूचकं शास्त्रं।५। तर्कः तर्को द्विविधः। प्रमाणैरर्थपरीक्षणं करोति शास्त्रं।६।
इत्येवमादीनि प्रयोजनानि विद्यास्थानानी। इत्युपांगानि॥ अथ परिशिष्टानि॥ यूपलक्षणं। छागलक्षणं
प्रतिज्ञानुवाकसंख्या। चरणव्यूह। श्राद्धकल्प। शुल्ब। पारषद। ऋग्यजुष। मिष्टकापूरणं। प्रवराध्याय।
उ उक्थशास्त्रं। क्रतुसंख्या। निगम। यज्ञपार्श्वं। होत्रकं। प्रसवोत्थानं। कूर्मलक्षणं। इत्यष्टादश परिशिष्टानि भ
वंति। अथ स्मृतिः॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः॥ यमापस्तंबसंवर्त्तकात्यायनबृहस्प
ती॥ पाराशरव्याससंखलिखिता दक्षगौतमौ॥ शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः॥ इति स्मृ
तिः॥ अथ पुराणानि॥ ब्राह्मं पाद्मं वैष्णवं च वायु भागवतं तथा॥ नारदीयं मार्कंडेयं आग्नेयं भविष्यं तथा। १

ब्रह्मवैवर्त्तं लैंगं च वाराहं स्कंदमेव च। वामनं कौर्म्यं मत्स्यं च गारुडं ब्रह्मांडमेव च॥२॥ इत्यष्टादश पुराणा
नि॥ एवं दशग्रंथयुक्तो यं वेदराशिः॥ तस्याश्चत्वारश्चरणा भवंति। एको वेदश्चतुर्द्धा तु यैः कृतो द्वापरादि
षु। भविष्ये द्वापरे चापि द्रोणिर्व्यासो भविष्यति॥ वेदद्रुमस्य मैत्रेय शाखाभेदैः सहस्रशः॥ न शक्तो वि
स्तरो वक्तुं संक्षेपेण शृणुष्व तं॥ वीर्यं तेजो बलं चाल्पं मनुष्याणामवेक्ष्य वै॥ हिताय सर्वभूतानां वेदभे
दं करोति सः॥ एक आसीद्यजुर्वेदस्तं चतुर्द्धा व्यकल्पयत्॥ चातुर्होत्रमभूद्यस्मिंस्तेन यज्ञमथोकरोत्।
आध्वर्यवं यजुर्भिश्च ऋग्भिर्होत्रं तथा मुनिः॥ उद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वणः॥ ततः स
ऋच उद्धृत्य ऋग्वेदं कृतवान्मुनिः॥ यजूंषि च यजुर्वेदं सामवेदं च सामभिः॥ राजंस्त्वथर्ववेदेन सर्वक
र्माणि स प्रभुः॥ कारयामास मैत्रेय ब्रह्मत्वं च यथास्थिति॥ ऋग्वेदो देवदेवस्यो यजुर्वेदस्तु मानुषः
सामवेदः स्मृतः पैत्रस्तस्मात्तस्य शुचिर्ध्वनिः॥ ऋक्संहितां च पैलाय वैशंपायय यजुस्तथा॥ साम्नां
सुमंतुर्वेदं याज्ञे मिनीश्चाप्यथर्वणः॥ चतस्रः संहिताश्चक्रे भेदाः कुर्वंति शौनकः॥ अथ पुराणं च णो

9

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० तुर्विभागलक्षणं ऋगादिसंहिताभेदः। अधुनामयाचसमर्प्यते॥ चत्वारश्चरणाः स्पष्टाभवंति॥ तथा
चशौनकः॥ ॥अथातश्चरणव्यूहं व्याख्यास्यामः। तत्र यदुक्तं चातुर्वेद्यं चत्वारो वेदा विज्ञाता भवंति
।ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति। तत्र ऋग्वेदस्याष्टस्थानानि भवंति। चर्चाश्रावकः च
र्चकः श्रवणीयः क्रमजटः क्रममालः क्रमशिखः क्रमलेखः क्रमध्वजः क्रमदंडः क्रमरथः क्र
मघनश्चेति। चतुःपारायणमध्ययनमित्यर्थः। एतेषां शाखाः पंचभवंति। आश्वलायनी शांखायनी
शाकली बाष्कली मांडुकी चेति। तन्मध्ये आश्वलायनः सूत्रकारः। सांख्यायनो ब्राह्मणकारः। अन्ये
त्रयः शाखाभेदान्निर्कुर्वंति। तन्मध्ये ऋग्वेदपादस्य षोडशभेदा भवंति। अत्र व्यासशिष्यः पैलश्चे
ति। पैलशिष्य इंद्रप्रमदइति। इंद्रप्रमदो बाष्कलीयसंहिताधीतः। तस्य चत्वारो भेदाः करोति। तस्य
शिष्याः बौध्यग्निमाठकौ याज्ञवल्क्यः पराशरश्चेति। इंद्रप्रमतपुत्रो मांडुकेयः। तस्य शाकलीय
संहिताः। तस्य पंचभेदाः करोति। तस्य शिष्या मुद्गलो गोभिलो वात्स्यः शालीयः शैशिरश्चेति। अन्ये १०

त्रीणिराकः पूर्णीरथंतरश्चेति। इंद्रप्रमतपुत्रः सांख्यायनो बाष्कलीयसंहिताधीताः॥ तस्य त्री
णि भेदाः करोति। तत्र कात्यायनी गार्ग्यः कथाजयाश्चेति। एताः षोडशभेदाः ऋग्वेदस्य संहिताः। ऋ
ग्वेदस्यात्रेयगोत्रं। अग्निर्देवतं। गायत्री छंदः। पद्मपत्रायताक्षः सुविभक्तग्रीवः कुंचितकेशीश्मश्रुः श्वे
तवर्णेनकीर्तितं तत्प्रमाणेनतिष्ठत्। वितस्त्यापंच। आयुर्वेदोपवेदः। प्रलंबवल्ली स्फुरितो द्विजन्मा क
ल्परिकामालकरे मरालं। क्षत्रानुतेजाः कृतदर्भमुद्रापन्मंडलख समवो ग्निमीळे॥१॥ तेषामध्ययन
मध्यायाः चतुःषष्टि मंडलानि दशैव तु। वर्गाणां परिसंख्यातं द्वेसहस्रेषडुत्तरे॥ ऋचां दशसहस्राणि
ऋचां पंचशतानि च॥ ऋचामशीतिःपादश्चैतत्पारायणमुच्यते॥ एकचैवश्चैकवर्गश्चैकश्चनवकस्त
था॥ द्वौ वर्गौ द्विर्ऋचौ ज्ञेयौ ऋक्तत्रपश्चात्तंस्मृतं॥ एवं ऋग्वेदः॥ अथ यजुर्वेदस्य कृष्णस्य सप्तविंश
त्यतिभेदा भवंति। अत्र व्यासशिष्यो वैशंपायनः। वैशंपायनशिष्यश्चरकः। तत्र चरकानां द्वादशभे
दाभवंति। चरकाः आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाः चारायणीयाः वारायणीयाः वार्त
तवीयाः श्वेताः अश्वतराः औपमन्यवः मैत्रायणीयाश्चेति। मैत्रायणीयानां सप्तभेदा भवंति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११

मानवाः दुंदुभाः छागलेयाः वाराहाः हारिद्रवेयाः श्यामाः श्यामायनीयाश्चेति। तत्र विशेषः। श्वकुंकुष्यामिति द्वैधातत्स्कृष्णे तैत्तिरीयके।। वैशंपायनशिष्येण याज्ञवल्क्येन तत्पुनः।। स्वश्रेयं बालकं सोथपराद्दृष्टमयातयत्।। शिष्यानाह वहे त्रीष्यान्ब्रह्महत्यापहं व्रतं।। अथाह याज्ञवल्क्यः किमेभिर्बहुभिर्मुनौ। क्लेशितैरल्पतेजोभिः करिष्येहमिदं व्रतं।। ततः क्रुद्धो गुरुः प्राह विद्यामस्यर्थयस्व च।। यागसामर्थ्यतो विद्यां धृतिं कृत्वा वमत्तदा।। अन्ये तित्तिरभूत्वा तु किंचित्किंचिद्भक्षयत्।। आध्वर्यवं कश्चिद्धौत्रं कश्चिद्दृस्यव्यवस्थितं।। बुद्धिमानिस्पहे त्वार्यं तुषुभिस्यवर्त्तीयतो। तत्र वैशंपायनशिष्यपुपेशस्तैत्तिरीयशाखाधीत। तच्च द्विभेदाभवत्। औखेयी खांडुकेयाश्चेति। खांडुकेयानां पंचभेदाभवंति। कालेता बौधायनीया हिरण्यकेशी भारद्वाजी आपस्तंबी सत्याषाढी चेति। एवं यजुःसपारः संहिताभेदः सप्तविंशतिः। यजुर्वेदस्य भारद्वाजगोत्रं रुद्रदैवत्यमानुष्टुभं छंदः पिंगाक्षः कृशमध्यः स्थूलगलकपोलः षड्दीर्घाग्निः धनुर्वेदोपवेदः श्वेताश्वरूढो करे चाक्षमाला वामे करे पाश ११

धनुर्गदा च। कपीलकेशो यजुर्कातराक्षो त्वं वेदसाक्षाद्द्रुतोईषेत्या।।२।। तेषामध्ययनमष्टाशतं यजुःसहस्राण्यधीत्य शाखापारो भवति। तान्येव द्विगुणान्यधीत्य पदपारो भवति। तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति। तत्र चतुश्चत्वारिंशत्सु पदग्रंथं। तत्र मध्ययनसौक्तिकप्रवचनीयाश्चेति।। सामवेदस्य किल सहस्रभेदा भवंति। आसीदनध्यायेष्वधीयानास्ते शक्रेण हताः प्रनष्टास्तेषां प्रवक्ष्यामि। त्रयोदशभेदाः सामसंहिता सामवेदपाद्व्यासशिष्यो जैमिनिः। तस्य पुत्रः सुमंतुः सुधासुकर्माश्चेति। तत्र सकर्मनाम पंचभेदाभवंति। हैरण्यनाभः कौसल्यपौल्किंजरकंसो ब्रह्मबलश्चेति। तत्र पौल्किंजि पंचभेदाभवंति। लौगाक्षिलांगुली कुल्यः कुसीदः कुक्षीश्चेति। पौल्किंजरस्योदीच्यतस्य त्रीणि भेदा भवंति। कौथुमा गोतमा। तत्र कौथुमानां बहुधा भवंति। आसुरायणीया बौद्रायणीया प्रांजलांग्वैनभ ताप्राचीनयोग्या आनीकाश्चेति। सामवेदस्य काश्यपगोत्रं सोमदैवत्यं पंक्तिश्छंदः निसंस्त्रग्वी सुप्रमनः शुचिः शुचिर्वासाः शमी दांतः बृहच्छरीरश्च महीदंडी कातरायन आदित्यवर्णेनव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रथ्यापथ्याश्चेति।सुमंतुशिष्योवेददर्शीतस्यद्वयोभेदंकरोति ५

१२ रत्निमात्रोगांधर्ववेदोपवेदःकेशपिंगलतारलोचनत्रैबाहुश्रतंकंकणंविभ्याणाजगतीसकाश्यप
स्तश्वेताश्वसंवाहनंचंचलकुंडलकर्णपूरलंकेकस्तूरीभालोंकितवेदसामगायनंचशुभंदषडरत्निमा
त्रंशुभं।अष्टौसामसहस्राणिसामानिचचतुर्दश॥अष्टोशतानिसवालखिल्यःससुवर्णंप्रेष्यणत
सामगणंस्मृतं॥ ॥३॥ ॥अथर्ववेदस्यपंचदशभेदाभवंति।तत्रअथर्वपादस्यव्यासशिष्यःसुमंतुःत
स्यपुत्रःकबंधश्चेति।तेस्यद्वयोर्भेदंकरोति।मंदोब्रह्मबलिश्चेति।ब्रह्मबलिद्वयोर्भेदंकरोति।शौल्का
यनीपिप्पलाश्चेति।पथ्यास्त्रयोभेदःकरोति।जाजलिकुमुदशौनकीत्रीणिभेदानिकरोति।बभ्रु
सौंधवमुंजकेशाश्चेति।एताःपंचदशभेदोथर्वणसंहिता।अम्यश्च।पैप्पलास्तौतादांताज्यालिकाब्र
ह्मबलाशौनकीदेवदर्शीचरणवेद्यःऔतामदाश्चेति।तत्रपंचकल्पानिभवंति।नक्षत्रकल्पोविधान
कल्पःसंहिताकल्पअभिचारकल्पःशांतिकल्पश्चेति।अथर्ववेदस्यवैतानगोत्रंरुद्रदैवसमानुष्टुभं
छंदःतीक्ष्णप्रचंडःकामरूपीविश्वात्माविश्वसृजगत्लोमलंबूवल्कशंदकमासवशाख्याध्यायीमा
त्तस्यमहानीलोत्सलवर्णेनषडरत्निमात्रःशास्त्रशास्त्राणिउपवेदः।धर्मात्मानितरोनंगसदशतंत्रपा १२

मोवपुर्मदितोवंचनूरुपामनेत्रभालतरलंकंठेक्षमालावलीमंत्रोच्चाटनवीर्यस्तंभनवशीसिद्धांतवेदार
योमूर्तिरक्षमथर्ववेदपुरुषोस्मन्वीशुचीदंतिनः।तेषामध्यमनंदशसहस्राणिभवंति।पंचकल्पक
ल्पेशतानिभवंति॥४॥एवंवेदराशिः।तत्रवेदराशेरूपंगोत्रंछंदोभेदापौवर्णयंति।जन्मजन्मनिवेदपा
रोभवति।जन्मजन्मनिवेदपारोभवति।अव्रतोव्रतीभवति।अब्रह्मचारीब्रह्मचारीभवति।अविद्या
विद्यावान्भवति।अधनोधनवान्भवति।अपुत्रःपुत्रवान्भवति।जातिस्मरोजायतेनमृइति।यंत्तदत्ताय
नमोयत्तदत्ताय।यइदंचरणव्यूहंश्राद्धकालेषुयःपठेत्॥अक्षय्यममतंश्राद्धंपितृंश्चैवोपतिष्ठते॥१
॥यइदंचरणव्यूहंपर्वसुश्रावयेद्द्विजः॥धौतपापाविनिर्मुक्तोब्रह्मभूयायकल्पते॥२॥यइदंचरण
व्यूहंगुर्विणीश्रावयेद्द्विजः॥गुणवाह्लभतेपुत्रोदीर्घमायुस्तथैवतु॥३॥एवंचतुष्पादभेदःशुक्लय
जुर्भेदःपंचदश।ऋक्पादभेदःषोडश।यजुःकृष्णपादभेदःसप्तविंशतिः।सामपादभेदस्त्रयोद
श।अथर्वणपादभेदःपंचदश।एवंमंत्रब्राह्मणयोर्यजुर्वेदस्यषडशीतिभेदाममाउक्ताः।शौन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९३ कोपिविशेषंचरणव्यूहेज्ञातव्य॥नमामिपरमानंदंचिन्मात्रंब्रह्मनिर्मलं॥उत्पत्तिस्थितिसं
हारंनिदानंपरमेश्वरं॥१॥तस्यनिश्वसितोराशिश्चतेदृष्टांतः।सयथार्द्रैधाग्नेरभ्याहितस्येति।
प्राजापत्याश्रुतिर्निसातद्विकल्पास्थिमद्विज॥एवंनचोदितंसर्वंयत्त्वत्पृच्छेहमीत्वया।लोका
तीतंमहाशंतंभक्तंतत्त्वंचगच्छसोनमस्त्याहभगवान्कात्यायनव्यासपाराशर्येव्यासपाराशर्यः
॥इतिश्रीकात्यायनगोत्रोत्सन्नयज्ञेश्वरेणग्रंथान्बहूनवलोक्यवेदभेदःसमर्प्यते॥ ॥७॥ ॥अ
थषडंगानामुक्तं॥छंदःपादौतुवेदस्यहस्तौकल्पोथपठ्यते।ज्योतिषामयनंतस्यनिरुक्तंश्रोत्रमु
च्यते॥शिक्षाघ्राणंतुवेदस्यमुखंव्याकरणंस्मृतं॥तस्मात्सांगमधीत्यैवब्रह्मलोकेमहीयते॥त
त्रशिक्षाकल्पोइत्यादि।तत्रशिक्षानाम।ॐकारःप्रथमंस्वरस्यशोंतस्यऊष्माएणमक्षरस्वरमा
त्रानुस्वारपरच्छेदकंठिकाव्यंजनविकारेश्वस्वरभक्तिविवृत्तिविश्रुतद्विर्भावद्विकरपिंडिविश्लि
ष्टोरस्यकंठमूर्द्धतालुदंतोष्ठजिह्वामूलीयोदात्तानुदात्तस्वरितप्रचितादिसमजात्योभिमहि ९३

तक्षेप्रमाश्लिष्टस्तैरोव्यंजनस्तैरोविरामपादस्यत्तस्तथाभाव्यइति॥षड्जऋषभगांधारपंचमधैवतनि
षाद्निघातजातिवर्णगोत्रसंचारोच्चारणगुरुलघुलघुतराधक्षेपोपक्षेपोभयक्षेपःखारिसंजन
रंजनरंगमाधुर्याक्षरव्यक्तियमानुनासिकाऽनुनासिकसर्वानुनासिकरेफस्थानकरणप्रयत्नत्रि
द्गुणएकं।एवंलक्षणमुक्तं।यत्रसंस्कारोच्चारणार्थं।शिक्षा॥मंत्रोहीनःस्वरतोमंत्रतोमिथ्याप्रयु
क्तोनतमर्थमाह॥सवाग्वज्रोयजमानंहिनस्तियथेन्द्रशत्रुःस्वरतोपराधात्॥१॥प्रधानस्वरवर्णा
भ्यांयोवैमंत्रःप्रयुज्यते॥यज्ञार्थंकुरुतेयत्रतुपसायुःप्रजाःपशून्॥२॥अवक्षरमनायुष्यंविस्व
रंव्याधिकारकं॥असंपूर्णंकृत्वामंत्रइन्द्रोवज्रंभविष्यति॥३॥लक्षणेनविनावाणीनिर्मलापि
नशोभते॥प्रमदारूपसंपन्नादारिद्र्यस्येवयोषिता॥४॥लक्षणेनविनावर्णान्प्रयुक्तेपश्चपा
तकः॥आयुर्हानिरधःपापोब्रह्महैवनसंशयः॥५॥एवंशिक्षा॥गर्भाधानंपुंसवनंसीमं
तोन्नयनंयथा॥जातकर्मनामकरणान्नप्राशनचूडाकरणोपनयनंचत्वारिवेदव्रतानिस्ना

नोनिष्क्रम

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१४ नंगोदानचियाहाग्न्याधानादिचतुष्टयंपंचमहायज्ञानुष्ठानंश्रावणीकर्मत्रयंदन्द्वयज्ञादित्रयनवा
न्नप्राशनाग्रहायणीनाष्टकास्तिस्रः पार्वणश्राद्धगोयज्ञश्चेत्याश्वयुजीतियषोत्सर्गादिस्मार्तं
अथश्रौतानिअग्निहोत्रंदर्शपूर्णमासावाग्रयणचातुर्मास्यानिनिरूढपशुबंधोध्वरोग्रहासो
षामानहवींषिअग्निष्टोमोग्निष्टोमात्युक्थ्यषोडशीवाजपेयोराजसूयःसौत्रामणीश्वयनाश्वमे
धोतिरात्रोरप्तोर्यामेत्यादिसूचितंसूत्रंस्रुक्स्रुवोलूखलमुसलवेदीध्मप्रस्तरप्रायश्चित्तेष्टीना
विमंत्रविकल्पार्थंकल्पं।एवंकल्पः॥एकत्वद्वित्वबहुत्वातिक्रांतोपस्थितवर्त्तमानकलालिंगदेश
निर्देशसंप्रदानापादानुच्चारसंधिषुनामाख्यातोपसर्गनिपातश्चचतुष्टयपदजातिस्वपदक्रमज
टादिअष्टविकृतयः।पदव्याकरणसंधिषुतथावेदलोकप्रयुक्तानामनेकार्थानांशब्दानांस्वरसंस्का
रोच्चारणार्थंव्याकरणं।एवंव्याकरणं॥देवगंधर्वोरगमनुष्यव्यतिकर्मसंज्ञाविधायितानांनामधातू
नांगसर्पगुल्मसारितुसमुद्रचतुर्विधसपदजातस्यतथास्तिकप्रयुक्तानामनेकार्थानामर्चंनिर्व १४

चनार्थंनैरुक्तं।एवंनैरुक्तं॥गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तीत्रिष्टुप्जगत्यतिजगतीशक्वर्यतिश
ष्टिधृत्यातिधृतिप्रकृत्याकृतिविकृतिसंस्कृतिसंस्कृत्युत्कृतयः।इत्येकविंशतिछंदांसिप्रथमछं
दसेकविंशतिभेदानिषड्छंदेभेदेनतेषांनहिश्लोकप्रयुक्तानांछंदसांगुरुलघुमर्कषार्थंछंदः।ए
वंछंदः॥विद्युपथिविकंपरिग्रहाह।तटिफलामुहूर्तनक्षत्रनाडिकादिपक्षमाससंवत्सरअयनकालसंव
त्सरविधानार्थंज्योतिषानयनं॥६॥एवंज्योतिषः॥इतिकात्यायनगोत्रोत्पन्नयज्ञेश्वरेणागम
तिष्ठाकृतं॥इतिवेदभेदःसांगःसंपूर्णः॥इतिविद्यातपोयोनिरयोनिर्विष्णुरीरितः॥वाग्यज्ञेनार्चि
तोदेवःप्रीयतांमेजनार्दनः१॥रविमंडलमध्यस्थपुरुषेलोकसाक्षिणि॥समर्पितंमयावेदंब्रह्मणः
धीता परमेपदे॥२॥छ॥ ॥अथातोधीत्यानिराकरणंमतीकंमेविचक्षणंजिह्वामेमधुमद्वचः॥कर्णाभ्यांभू
रिश्रुश्रुवेमात्वंहर्षीःश्रुतंमयिब्राह्मणंब्रह्मणःप्रवचनमसिब्रह्मणःप्रतिष्ठानमसिब्रह्मणःकोशो
सिसनिरसिशांतिरस्यानिराकरणमसिब्रह्मकोशंमेविशवाचावेमपिदधामिवाचात्वपिदधामिनस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५ तिष्ठप्रतिषेधस्तुक्तास्वरकरणकं ज्योरसदृंसोष्ठग्रहणधारणोच्चारणशक्तिर्मयिभवत्विति।आप्या
यंतुमेंगानिवाक्प्राणश्चक्षुः श्रोत्रंयशोबलं।यन्मेश्रुतमधीतंतन्मेमनसितिष्ठतुतिष्ठतु॥अथवेरा
णांद्विजानांमग्निंदिनमध्ययनंविहितं।अतःकारणात्अधीत्याधीत्यपठित्वा।अनिराकरणमपरित्या
गःकर्त्तव्यः।वक्ष्यमाणेननिगदेनमंत्रार्थकंमुखंमेममविचक्षणंसाधुशब्दोच्चारणसामर्थ्यंमेममजिह्वा
मधूत्वामधुरसवत्तद्वत्कर्णाभ्यांभूरिबहुश्रुतंश्रवेश्रणुयां।अहंमात्वाहर्षीश्रुतंअधीतंपठितंस्वम
हर्षीमापनयः।मयिविषयेब्रह्मणोवेदस्यप्रवचनंअध्यापनंव्याख्यानंवाअस्तिभवतु।तथाब्रह्मणो
वेदस्यप्रतिष्ठानंप्रतिष्ठाअसि।मयीस्तनुवर्त्तते।ब्रह्मकोशोसि।ब्रह्मणःशब्दरूपस्यकोशःगोपनगृ
हंगुप्तिस्थानमसि।तथासनिःसंभजनंजीवनमसि।शांतिरसि।शांतिःअनिष्टस्यअनिष्टहेतोःश्वा
सनंनिराकरणंनिराकृतिस्त्यागः।निराकरणंअनिराकरणमसि।ब्रह्मकोशंमेविश।मेममब्रह्मको
शंहृदयंविश।सर्वेषांवेदानांहृदयमेकायनश्रुतिश्रुतेः।वाचागिराकृत्वाअपिदधामिछादयामि।स्वरा १५

उदात्तानुदात्तस्वरिताः।करणानिशब्दोत्पत्तेः।शब्दाभिव्यक्तेर्वासाधनानि।उरःकंठशिरोजिह्वामूल
दंतनासिकोष्ठतालुनित्याद्याः।ग्रहणंस्वरशब्दकरणानिच।एतेषांग्रहणमुपादानं।धारणंस्थि
रीकरणं।उच्चारणप्रयोगः।ग्रहणधारणोच्चारणानि।तेषुमयिशक्तिर्भवतु।सामर्थ्यमेस्तु।मेम
मअंगानिगात्राणि।आप्यायंतुवर्द्धतां।नकेवलमंगानि।वाक्वाणी।प्राणःप्राणेंद्रियं।चक्षुर्नयने
द्रियं।श्रोत्रंश्रवणेंद्रियं।यशःकीर्त्तिः।बलंशरीरमोजः।एतान्यपिवागादीनिआप्यायतामित्य
नुषंगः।यन्मेश्रुतं[illegible]मनसितिष्ठतुतिष्ठतु।यन्मेममश्रुतं।मीमांसाद्यधीतंवागादितत्सर्वंमेम
नसितिष्ठतुतिष्ठतुस्थिरीभवतु॥अत्रवीप्साअर्थभूयस्त्वप्रतिपादनार्थं।ग्रंथसमाप्तिज्ञापनार्थं॥
इतिकात्यायनगोत्रोत्पन्नयज्ञेश्वरेणग्रंथान्बहूनवलोक्यवेदभेदःकृतः॥छ॥शके१७८५संव
त्१९२०युवनामसंवत्सरेदक्षिणायनेवर्षाऋतौश्रावणकृष्णचतुर्दश्यांभृगुवासरेकूर्परग्रामवासिना।
जोशीत्युपनामकसखारामभट्टात्मजबालकृष्णेनलिखितमिदंपुस्तकं॥श्रीयज्ञेश्वरार्पणमस्तु॥छ॥

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 10:45
,TRANSFERRED=2020/10/22 at 10:47:14
,PAGES=15
,TYPE=STD
,NAME=S0004344
,Book Name=M-839-VEDBHED
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection